श्रीमते रामानुजाय नमः

**श्री देवराज गुरुभिरनुगृहीता**

## ॥ उत्तरदिनचर्या॥

अथ गोश्ठीं गरिश्ठानामधिश्ठाय सुमेधसां।
वाक्यालङ्कृतिवाक्यानां व्याख्यातारं नमामि तं॥ १

सायन्तनं ततः कृत्वा सम्यगाराधनं हरेः।
स्वैरालापैः शुभैश्श्रोथृन्नन्दयन्तं नमामि तं॥ २

ततः कनकपर्यङ्के तरुणाद्युमणिद्युतौ।
विशालविमलश्लक्ष्णतुङ्गतूलासनोज्ज्वले॥ ३

समग्रसौरभोद्गारनिरन्तरदिगन्तरे।
सोपधाने सुखासीनं सुकुमारे वरासने॥ ४

उन्मीलप्पद्मगर्भद्युतितलमुपरि क्षीरसङ्घातगौरं
राकाचन्द्रप्रकाशप्रचुरनखमणिद्योतविद्योतमानं।
अङ्गुल्यग्रेषु किञ्चिन्नतमतिमृदुलं रम्यजामातृयोगी
दिव्यं तत्पादयुग्मं दिशतु शिरसि मे देशिकेन्द्रो दयालुः॥ ५

त्वम् मे बन्धुस्त्वमसि जनकस्त्वं सखा देशिकस्त्वं
विद्या वृत्तं सुकृतमतुलं वित्तमप्युत्तमं त्वं।
आत्मा शेषी भवसि भगवन्नान्तरश्शासिता
त्वं यद्व सर्वं वरवरमुने! यद्यदात्मानुरूपं॥ ६

श्रीमते रामानुजाय नमः

अग्रे पश्चादुपरि परितो भूतलं पार्श्वतो मे
मौलौ वक्त्रे वपुषि सकले मानसाम्भोरुहे च।
दर्शंदर्शं वरवरमुने दिव्यमङ्घ्रिद्वयं ते
नित्यं मज्जन्नमृतजलधौ निस्तरेयं भवाब्धिं॥ ७

कर्माधिने वपुषि कुमतिः कल्पयन्नात्मभावं
धुःखे मग्नः किमिति सुचिरं दूयते जन्तुरेषः।
सर्वं त्यक्त्वा वरवरमुने! सम्प्रति त्वत्प्रसादाद्दिव्यं
प्राप्तुस्तव पदयुगं देहि मे सुप्रमातं॥ ८

या या वृत्तिर्मनसि मम सा जायतां संस्मृतिस्ते
यो यो जल्पस्स भवतु! विभो! नामसङ्कीर्तनं ते।
या या चेष्टा वपुषि भगवन्! सा भवेद्वन्दनं ते
सर्वं भूयाद्वरवरमुने! सम्यगाराधनं ते॥ ९

अपगतमदमानैः अन्तिमोपाय निष्टैः
अधिगतपरमार्थैः अर्थकामान् अपेक्षैः।
निखिलजनसुहृदिभिः निर्जित क्रोध लोभैः
वरवरमुनि भृत्यैः अस्तु मे नित्य योगः॥ १०

इति स्तुति निबन्धेन सूचितस्व्मनीषितान्।
भृत्यान् प्रेमार्द्रया दृश्ट्या सिञ्चन्तं सिन्तयामि तं॥ ११

अथ भृत्याननुज्ञाप्य कृत्वा चेतश्शुभाश्रये।
शयनीयं परिष्कृत्य शयानं संस्मरामि तं॥ १२

दिनचर्यामिमां दिव्यां रम्यजामातृयोगिनः।

भक्त्या नित्यमनुध्यायन् प्राप्नोति परमं पदं॥ १३

**॥ इति उत्तर दिनचर्या समाप्ता॥**